# पूर्णबोधस्तोत्रम्

1. नळिनसौन्दर्यजिष्णुं पदाभ्यां लळितरूपाङ्गुलीमङ्गलाभ्याम्
दळितनूत्नेन्दुमानं नखाल्या दळितशोणोपलाळीकनाल्या
प्रणतवान् प्राणिनां प्राणभूतं प्रणतिभिः प्रीणये पूर्णबोधम् ॥

2. अहिविहङ्गेशभूतेशपूर्वैरहमहम्पूर्वमित्याप्तचित्तैः
मुहुरहो मांसनेत्रैरष्टैरिह समाजुष्टजंघांघ्रिरेणुम्
प्रणतवान् प्राणिनां प्राणभूतं प्रणतिभिः प्रीणये पूर्णबोधम् ॥

3. कनयमानं दधानं प्रकाशैः कनककौशेयमाशावकाशम्
जनमनोहारिवृत्तोरुकान्त्या जनितसम्पर्कसम्पद्विशेषम्
प्रणतवान् प्राणिनां प्राणभूतं प्रणतिभिः प्रीणये पूर्णबोधम् ॥

4. परदुरारोहमारोहयेत् यं पुरुषकान्डप्रकान्डो निजाङ्कम्
निरवधिस्नेहसन्दोहमन्दस्फुरितहासावलोकेन साकम्
प्रणतवान् प्राणिनां प्राणभूतं प्रणतिभिः प्रीणये पूर्णबोधम् ॥

5. सुवलिभंभद्रगम्भीरनाभिं शिवमुदारोदरं मञ्जुमध्यम्
सुविपुलोरस्थलंमानयन्ते कविजना यस्यसन्देहदेहम्
प्रणतवान् प्राणिनां प्राणभूतं प्रणतिभिः प्रीणये पूर्णबोधम् ॥

6. विकटसुस्तम्भसम्भावनीयं प्रकटमम्भोजनाभोपभाजा
विकटविद्याविलासाङ्गणं धीस्फुटकनन्मण्टपं यस्य रम्यम्
प्रणतवान् प्राणिनां प्राणभूतं प्रणतिभिः प्रीणये पूर्णबोधम् ॥

7. भुजगभोगाभमुद्यम्य हृद्यं निजभुजं दक्षिणम् लक्षणाढ्यम्
लळितमुद्रीक्तविज्ञानमुद्रम् भजभजानन्तमित्यालपन्तम्
प्रणतवान् प्राणिनां प्राणभूतं प्रणतिभिः प्रीणये पूर्णबोधम् ॥

8. भवदवोष्णेन् तातप्यमानान् भुवि परं नाथमप्रेक्षमाणान्
भुवनमान्येनचान्येनदोष्णा भवतु भीर्मेति नः सन्त्वयन्तम्
प्रणतवान् प्राणिनां प्राणभूतं प्रणतिभिः प्रीणये पूर्णबोधम् ॥

9. अधिगलं वानरो वन्यमालां विधिमुखोदारभूभारमालाम्
विधिविधात्राऽक्षमालां पुरायो व्यधित लोकाततां कीर्तिमालाम्
प्रणतवान् प्राणिनां प्राणभूतं प्रणतिभिः प्रीणये पूर्णबोधम् ॥

10. मृदुतमं विभ्रमं बिभ्रदासीत् वदनमिंदोःसमं यस्य साक्षात्
मदनमुद्दीपयेदिंदुरेतन्मदसखं संदेहेदेष भेदः
प्रणतवान् प्राणिनां प्राणभूतं प्रणतिभिः प्रीणये पूर्णबोधम् ॥

11. विमुमुहुःसिंहनादेन दैत्याःप्रमुमुहुःसज्जनाःसधुवाण्या
मम गुरोःपूर्वतन्वोरिदानीं सममिदं वाख्यया यस्य जातम्
प्रणतवान् प्राणिनां प्राणभूतं प्रणतिभिः प्रीणये पूर्णबोधम् ॥

12. शिवमुखैरेकतो देववृन्दैःशुकमुखैरन्यतःसन्मुनीन्द्रैः
शुकषुचिव्याख्यमास्राकुलाक्षैःशिरसि बद्धाञ्जलिं भक्तिहेतोः
प्रणतवान् प्राणिनां प्राणभूतं प्रणतिभिः प्रीणये पूर्णबोधम् ॥